## वाक्यस्य टेः प्लुत उदात्तः । (८२/९३)

[1]अधिकारोऽयम् । वाक्यस्य टेः इति, प्लुतः इति च, उदात्तः इति च, एतत् त्रयमप्यधिकृतं वेदितव्यमापादपरिसमाप्तेः । यत् इत ऊर्ध्वमनुक्रमिष्यामः वाक्यस्य टेः प्लुत उदात्तः इत्येवं तद् वेदितव्यम् । वक्ष्यति – 'प्रत्यभिवादेऽशूद्रे' (८.२.८३/९४) । अभिवादये देवदत्तोऽहम्, भो आयुष्मानेधि देवदत्त३ । [2]पदाधिकारोऽनुवर्तते एव । वाक्यग्रहणमनन्त्यस्य पदस्य प्लुतनिवृत्त्यर्थम् । टिग्रहणं व्यञ्जनान्त्यस्यापि टेरचः प्लुतो यथा स्यात्, [3]अग्निचि३त् इति ॥

## प्रत्यभिवादेऽशूद्रे । (८३/९४)

प्रत्यभिवादो नाम यदभिवाद्यमानो गुरुराशिषं प्रयुङ्क्ते, तत्र अशूद्रविषये[4] यद् वाक्यं वर्तते तस्य टेः प्लुत उदात्तो भवति । अभिवादये देवदत्तोऽहम्, भो आयुष्मानेधि देवदत्त३[5] । अशूद्रे इति किम् ? अभिवादये [6]तुषजकोऽहम्, भो आयुष्मानेधि तुषजक ।

[९२८] स्त्रियामपि प्रतिषेधो वक्तव्यः । (म.भा. ३. ४१६)

अभिवादये गार्ग्यहम्, भो आयुष्मती भव गार्गि । असूयकेऽपि केचित् प्रतिषेधमिच्छन्ति, अभिवादये स्थाल्यहं भोः, आयुष्मान् एधि स्थालिन् । [7]यावच्च तस्यासूयकत्वं न ज्ञायते तावदेव प्रत्यभिवादवाक्यम् । तस्मिंस्त्वसूयकत्वेन निर्ज्ञाते [8]प्रत्यभिवादः एव नास्ति, कुतः प्लुतः । तथा [9]ह्युक्तम् – [10]असूयकस्त्वं जाल्म, न त्वं [11]प्रत्यभिवादनमर्हसि, भिद्यस्व वृषल [12]स्थालिन् (म. भा. ३. ४१६) इति । अभिवादनवाक्ये यत् सङ्कीर्तितं नाम गोत्रं वा, [13]तद् यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्र [14]प्लुतिः इष्यते । इह [15]न भवति, देवदत्त कुशल्यसि, देवदत्त आयुष्मानेधि इति ।

[९२९] भो राजन्यविशां वेति वक्तव्यम् । (म. भा. ३. ४१६)

भो अभिवादये देवदत्तोऽहम्, आयुष्मानेधि देवदत्त भोः३, आयुष्मानेधि देवदत्त भोः । राजन्य – अभिवादये इन्द्रवर्मा अहं भोः, आयुष्मानेधि इन्द्रवर्म३न्, आयुष्मानेधि इन्द्रवर्मन् । विश् – अभिवादये इन्द्रपालितोऽहम् भोः, आयुष्मानेधि इन्द्रपालित३, आयुष्मानेधि इन्द्रपालित ॥

## दूराद्धूते च । (८४/९८)

दूराद्धूते यद् वाक्यं वर्तते तस्य टेः [16]प्लुतो भवति, स चोदात्तः[17] । आह्वानं हूतम्, शब्देन सम्बोधनम् । आगच्छ भो माणवक देवदत्त३ । आगच्छ भो माणवक यज्ञदत्त३ । दूरं यद्यप्यपेक्षाभेदाद[18]नवस्थितम्, तथापि हूतापेक्षं यत् तदाश्रीयते इति यत्र प्राकृतात् प्रयत्नाद् [19]यत्नविशेषे आश्रीयमाणे शब्दः श्रूयते तद् दूरम् । हूतग्रहणं च सम्बोधनमात्रोपलक्षणार्थं द्रष्टव्यम् । तेन यत्राप्याह्वानं नास्ति तत्रापि प्लुतिर्भवति, सक्तून् पिब देवदत्त३, पलायस्व देवदत्त३ इति । अस्याश्च प्लुतेरेकश्रुत्या समावेशः इष्यते । दूरात् इति किम् ? आगच्छ भो माणवक देवदत्त । दूरादाह्वाने वाक्यस्यान्ते यत्र सम्बोधनपदं भवति तत्रायं प्लुतः इष्यते, तेनेह न भवति, देवदत्त आगच्छ ॥

---

1. अधिकारोऽयम् नास्ति क.इ.ह. 2. पदाधिकारोऽनुवर्तते एव नास्ति ब. 3. अग्निचीदिति ब. ड, सोमसुदिति ड. 4. प्रत्यभिवादे इत्यधिकम् ड. 5. इति इत्यधिकम् इ. 6. तुपूजको क. इ. 7. यावच्च नास्ति क. इ. 8. अभिवाद एव क, नास्ति ह. 9. चोक्तम् क. 10. असूयकः नास्ति इ. 11. प्रत्यभिवादमर्हसि इ. ड. 12. स्थालिवत् क. इ. 13. तद् नास्ति क. 14. प्लुतिः नास्ति इ. 15. हि इत्यधिकम् ह. 16. प्लुतः उदात्तो भवति इ. 17. भवति इत्यधिकम् क. 18. अव्यवस्थितम् ड. 19. प्रयत्नाविशेषे इ.क.ह.ब.